# Sharngapani Stotram

## શાર્ઙ્ગપાણિસ્તોત્રમ્

## Document Information

Text title : Sharngapani Stotram

File name : shArngapANistotram.itx

Category : vishhnu, viShNu, krishna

Location : doc_vishhnu

Transliterated by : Saritha Sangameswaran

Proofread by : Saritha Sangameswaran, NA

Latest update : January 19, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 20, 2026

*sanskritdocuments.org*

# શાર્ઙ્ગપાણિસ્તોત્રમ્

સકલભુવનસારં ગાત્રકાન્ત્યામસારં
મણિવરમભિભૂતં સઞ્ચરન્તં પ્રભૂતમ્ ।
સ્વગપરિવૃઢપત્રં ચન્દ્રકાન્તાતપત્રં
સ્મરનતમુચુકુન્દં શાર્ઙ્ગપાણિં મુકુન્દમ્ ॥ ૧॥

સ્વર્ણાબ્જિનીદર્શનમાત્રપૂતાઃ
શ્રીકુમ્ભઘોણે કૃતનિત્યવાસાઃ ।
શ્રીશાર્ઙ્ગપાણૌ દૃઢભક્તિયુક્તાઃ
સન્તઃ કિયન્તો નિવસન્તિ લોકે ॥ ૨॥

નિર્નિદ્રનીરેરુહપત્રનેત્રં
શરાન્નિશાનાથમુખારવિન્દમ્ ।
શનૈઃ શનૈસ્ત્યજ્ય (?)ભવાભિલાષં
શ્રીશાર્ઙ્ગિણં ચિન્તય મત્કચેતઃ ॥ ૩॥

કદા નીરદાપાયરાકેન્દુપદ્મ-
પ્રતિચ્છન્દમાસ્યં તવાલોકયિષ્યે ।
કદા ક્રૂરભાષં મુખં દુષ્પ્રભૂણાં
ધનાશાવબદ્ધો ન પશ્યામિ શાર્ઙ્ગિન્ ॥ ૪॥

નમઃ શાર્ઙ્ગહસ્તાય હસ્તીન્દ્રપાત્રે
નમશ્ચન્દ્રવક્ત્રાય પીતામ્બરાય ।
નમઃ સિંહરાજાય સિંહારિભેત્રે
નમઃ શુદ્ધસત્ત્વાત્મને મુક્તિદાયિ ॥ ૫॥

નમો નીલજીમૂતનીકાશ તુભ્યં
નમો વિક્રમાક્રાન્તલોકત્રયાય ।
અપારામિતક્લેશસંસારસિન્ધો-
ર્નિજં સેવકં શાર્ઙ્ગભૃત્તારયાશુ ॥ ૬॥

નમામિ શાર્ઙ્ગિણં હરિં સ્મરામિ ચક્રિણં પરં
વદામિ નામ કેશિહન્તુરિન્દિરાપતેરહમ્ ।
ન દૈવતાન્તરં સ્મેર નમામિ નાન્યમેકદા-
પ્યહં તવૈવ કિઙ્કરોસ્મિ નાન્યનામ વા વદે ॥ ૭॥

ગજાનન, જનાર્દન, પ્રણતપાવન શ્રીવર-
ઘુસમ્ર, હૃદયામ્બુજપ્રકટનાર્કદૈત્યાન્તક ।
વિરિઞ્ચિવચનાવલિવિનુતપાદ (?)વિષ્ણો હરે
રથાઙ્ગદરશાર્ઙ્ગભૃદ્ભયહરેતિ જિહ્વે વદ ॥ ૮॥

અતિનિકટે વસતો મે પરિચરણાર્થં તવ પ્રભો શાર્ઙ્ગિન્ ।
ચામરમયૂરપત્રવ્યજનાદિષુ દેયમેકં મે ॥ ૯॥

કૌમુદીવિશદસ્મિતં મધુભાષણં સુરપાલનં
ચન્દ્રપઙ્કજબન્ધુલોચનમિન્દિરારમણં હરિમ્ ।
ચણ્ડબાહુપરાક્રમાસુરસઙ્ઘમર્દનમદ્ભુતં(?)
શાર્ઙ્ગચાપમુપાસ્મહે શુભકુમ્ભઘોણકૃતાલયમ્ ॥ ૧૦॥

અભૂકલત્રૈરપતઙ્ગવાહૈરમેઘનીલૈરરથાઙ્ગહસ્તૈઃ ।
અપઙ્કજાક્ષારૈપયોધિવાસૈરશાર્ઙ્ગચાપૈરલમન્યદેવૈઃ ॥ ૧૧॥

મરુચ્ચન્દ્રસૂર્યૌ વિયચ્ચાગ્નિરીશો
જલં ભૂરિમામૂર્તયો યસ્ય ચાષ્ટૌ ।
તૃણં વાપિ ન સ્પન્દતે યસ્ય શક્તિં
વિના વન્દ્ય એકઃ સ નશ્શાર્ઙ્ગપાણિઃ ॥ ૧૨॥

ભવતિ મતિરુદારા શાર્ઙ્ગપાણૌ કદા નઃ
પરિહૃતકલિદોષે શેષશય્યાશયાને ।
વિરમતિ ચ કદા વા દુઃખદારિદ્ર્યમૂર્છા
જટિલભવનિતાન્તાસક્તિદુર્વ્યાપૃતેશ્ચ ॥ ૧૩॥

નવજલધરનીલં નિર્મિતાનઙ્ગખેલં
રહસિ જલધિકન્યાબાહુસંશોભિકણ્ઠમ્ ।
કિમપિ મધુરવાચાં ચ વૃન્દમુચ્ચારયન્તં
મનસિ સતતમીડે શાર્ઙ્ગપાણિં મુકુન્દમ્ ॥ ૧૪॥

વજ્રાઙ્કુશાદિશુભરેખમુમાધવેન
ધાત્રાર્પિતં શિરસિ ભક્તિભરેણ દિવ્યમ્ ।
નાનાવિધૈઃ સુરતરુપ્રભવૈઃ પ્રસૂનૈઃ
સંશોભિશાર્ઙ્ગધરપાદસરોજમીડે ॥ ૧૫॥

લસન્મન્દહાસં શ્વસદ્ભોગિરાજે
શયાનં દયાનન્દપૂર્ણાન્તરઙ્ગમ્ ।
સહસ્રારશઙ્ખાસિકૌમોદકીભિઃ
સદા સેવિતં શાર્ઙ્ગપાણિં નમામિ ॥ ૧૬॥

વિયદ્રૂપિણં વિશ્રુતામેયકીર્તિં
વિરૂપાક્ષવિધ્યન્તરમભોજસૂર્યમ્ ।
વિયદ્ભઙ્ગયા ક્ષાલિતાઙ્ઘ્રિં પ્રસન્નં
શ્રયે શાર્ઙ્ગપાણિં શિવં સજ્જનાનામ્ ॥ ૧૭॥

નવમણિમયમુદ્રામણ્ડિતસ્વઙ્ગુલીયં
કરકમલમુદારં મસ્તકે મે નિધેહિ ।
દશશતરવિરાકાચન્દ્રસાહસ્રચઞ્ચ-
ત્તરવિપુલવિમાનારૂઢ હે શાર્ઙ્ગધન્વન્ ॥ ૧૮॥

લસન્નાસિકા તે સુચામ્પેયકોશ-
પ્રભા શારદામ્ભોદપત્રાયતાક્ષ ।
ભ્રુવૌ કામબાણાસનાહઙ્કૃતિઘ્ને
વપુસ્તે જગન્મોહનં શાર્ઙ્ગપાણે ॥ ૧૯॥

ત્વયિ સતિ કરુણાર્દ્રે શાર્ઙ્ગધન્વાભિધાને
કરિવરદ જગત્યાં કામધેનૌ ત્વદન્યમ્ ।
કિમિતિ નરમુપાસે શોકગર્વાભિભૂતં
કલય હૃદયમેતત્ત્વત્પદામ્ભોજલગ્નમ્ ॥ ૨૦॥

કદા શાર્ઙ્ગચાપપ્રમુક્તૈઃ પૃષત્કૈઃ
વિદાર્યારિસઙ્ગાન્મદીયાન્દયાબ્ધે ।
નૃસિંહસ્ય વેષં વહન્દૈત્યપુત્રં
યથા પાલયસ્ત્વં તથા પાસિ શાર્ઙ્ગિન્ ॥ ૨૧॥

ધવલનલિનદામ્ના શોભમાનં વિરિઞ્ચિ-
પ્રમુખવિભુદવૃન્દૈર્વર્ણિતાનન્તલીલમ્ ।

નિખિલનિગમગીતં નિર્નિમેષાધિરાજં
નિરતિશયસુખાબ્ધિં શાર્ઙ્ગપાણિં ભજામઃ ॥ ૨૨॥

નિજવપુષિ દધાનઃ સર્વલોકાનિમાંસ્ત્વં
કિમુ ન વહસિ વિષ્ણો માં તૃણાત્ફલ્ગુભૂતમ્ ।
નનુ વિદિતમમોઘં નામ તેનન્ત વિશ્વં-
ભર ઇતિ ભરણં મે કિં તવાતીવ ભારઃ ॥ ૨૩॥

ચન્દ્રમૌલિસરોજસમ્ભવવન્દિતં વિબુધેશ્વરં
ક્ષીરવારિધિમધ્યમન્દિરસૌધભાગવિલાસિનમ્ ।
ભોગિરાજશયં વરં વિમલાશયાવનદીક્ષિતં
શાર્ઙ્ગપાણિમહં ભજે પરતત્ત્વરૂપમઘાન્તકમ્ ॥ ૨૪॥

કુણ્ડલદ્વયમણ્ડિતાંસયુગં યુગાભચતુર્ભુજી
પ્રસ્ફુરદ્દરચક્રશાર્ઙ્ગસરોજમમ્બુજલોચનમ્ ।
ચામરૈરુપવીજિતં ચપલાયુતપ્રભવાસસં
શાર્ઙ્ગિણં ભવહારિણં ફણિશાયિનં પ્રણમામિ તમ્ ॥ ૨૫॥

નખાગ્રઘાતા ભિદલત્કઠોર-
હિરણ્યમર્ભાણ્ડકભિત્તિજન્મા ।
ગઙ્ગાપ્રવાહઃ કિલ યસ્ય સાક્ષા-
ચ્છિવેન શીર્ષ્ણા વિધૃતઃ સ્મરે તમ્ ॥ ૨૬॥

ભૂમૌ દેવગણા વસન્તિ શતશો ભક્તાવલીવત્સલા
બ્રહ્માદ્યા અતિશીઘ્રમેવ ફલદાઃ પાદાનતઃ ખણ્ડલાઃ ।
હિત્વા તાન્ કૃતપૂર્વદેવ કદને નિદ્રાલસે નિર્મમે
દેવેશર્ઙ્ગધરે કલિપ્રિયસખે ચેતઃ સ્થિરં મેદ્ભુતમ્ ॥ ૨૭॥

વિશ્વમ્ભરે જાગ્રતિ ચક્રપાણૌ,
વિહાય તત્સેવનમદ્ય મોહાત્ ।
ખિન્નં સદા સ્વોદરપૂરણેઽપિ
પુમામ્સમન્યે ખલુ હા ભજામઃ ॥ ૨૮॥

ચાતક ઇવ જીમૂતં ચકોરપક્ષીમિવ ચન્દ્રમસમ્ ।
કાદમ્બિનીમિવ શિખી સદૈવ શાર્ઙ્ગિન્ સ્મરામિ ॥ ૨૯॥ (તવ રૂપં)

જલધિતનયા વામોત્સઙ્ગે શયાનમનામયં

શમિતદનુજં શાન્તાકારં શરીરભૃતાં પ્રભુમ્ ।
શરણમધુના યામિ શ્રેયસ્કરં નમતાં સદા
શશિરવિસદૃશં શ્રીમચ્છાર્ઙ્ગાયુધં વિબુધેશ્વરમ્ ॥ ૩૦॥

ચતુર્ભુજં ચન્દનચર્ચિતાઙ્ગં
ચતુર્મુખાદ્યૈરભિવન્દ્યપાદમ્ ।
ચામીકરાદ્રીન્દ્રધનુપ્રિયં તં
ચક્રાયુધં શાર્ઙ્ગધરં પ્રપદ્યે ॥ ૩૧॥

પ્રફુલ્લમલ્લીવકુલામ્બુજાત-
ચામ્પેયમાલોત્કરશોભિકણ્ઠમ્ ।
કણ્ઠીરવાસ્યં દલિતારિવર્ગં
પ્રભું ભજામો હૃદિ શાર્ઙ્ગપાણિમ્ ॥ ૩૨॥

શરચ્ચન્દ્રિકામઞ્જુલં મન્દહાસં
કદા શાર્ઙ્ગપાણેર્વયં લોકયામઃ ।
રમારાધિતં પાદપઙ્કેરુહં તત્
કદા સંસ્પૃશામો મુદા મસ્તકેન ॥ ૩૩॥

દરિદ્રાપદં દારયાદ્યૈવ દેવ
સ્વકીયાન્ સદા રક્ષ ઋક્ષેશવક્ત્ર ।
સ્વપૂરૈર્ગૃહં પૂરયાદ્યાસ્મદીયં
સ્વતન્ત્રોઽસિ યદ્રોચતે તત્કુરુષ્વ ॥ ૩૪॥

ત્વત્કીર્તનં તવ કથાશ્રવણં જનાનાં
સંસારહારિ નમતામપવર્ગકારિ ।
બ્રહ્માદિવન્દ્યપદપઙ્કજ દિવ્યમૂર્તે
માં પાહિ શાર્ઙ્ગધર સર્વસુરાધિરાજ ॥ ૩૫॥

કસ્તૂરિકાતિલકશોભિમુખેન્દુબિમ્બ-
મોષત્સ્મિતાઞ્ચિતમમોઘકૃપાર્દ્રવીક્ષમ્ ।
દ્રક્ષ્યે કદા મધુરભાષિ પવિત્રકીર્તે
શ્રીશાર્ઙ્ગચાપધર વેદશિરઃ સુવેદ્ય ॥ ૩૬॥

રાકાશરચ્છશધરાતુલગર્વપૂર-
સઙ્કર્ષણં કરુણયા કલિતાધિવાસમ્ ।
સન્દર્શયાસ્યમધુના નવપદ્મકાન્તિ-

નિક્ષેપહારિ મમ સુન્દર શાર્ઙ્ગપાણે ॥ ૩૭॥

વન્દામહે તવ પદં સુરવૃન્દમૌલિ-
માણિક્યદીપ્તિકલિતં હૃદિ શાર્ઙ્ગપાણે ।
મોહાન્ધકારતરણે કરુણામ્બુરાશે
હે વારિજાક્ષ શશિબિમ્બસમાસ્યબિમ્બ ॥ ૩૮॥

શમ્ભુપ્રજેશ્વરશતક્રતુભિઃ સદૈવ
સંસ્તૂયમાનકૃતમન્દિર કુમ્ભઘોણે ॥

સર્પેન્દ્રતાર્ક્ષ્યશયનાર્વકિરીટભાસા
ધિક્કારિતાર્ક શરણં ભવ શાર્ઙ્ગપાણે ॥ ૩૯॥

ત્વં માતાસિ પિતા ત્વમેવ ચ સુહૃદ્બન્ધુસ્ત્વદન્યં હરે
મન્યે નૈવ સુરં સુરેન્દ્રમપિ વા બ્રહ્માણમીશં ગૃહમ્ ।
વૈકુણ્ઠે તવ સન્નિધૌ નિવસતિસ્ત્વન્મૂર્યવેક્ષા સદા
ભૂયાન્મે ન પરં વૃણે વરમહં શ્રીશાર્ઙ્ગપાણિપ્રભો ॥ ૪૦॥

નિગમશિરસા વેદ્યં હૃદ્યં જિતારુણપલ્લવં
જનિમૃતિજરાર્તિઘ્નં નિઘ્નં સદા સ્મરતાં હૃદિ ।
ચરણયુગલં ત્વત્કં સ્વામિન્ પ્રદર્શય નઃ સદા
નિરવધિકૃપાકૂપારોસિ પ્રભો વરશાર્ઙ્ગભૃત્ ॥ ૪૧॥

ત્વત્સેવાદર્પભૃતં બ્રહ્મેશાદીન્ સુરાનગણયન્તમ્ ।
અહમાત્માનં વિષ્ણો કદા વિલોકે કૃતાર્થમિવ શાર્ઙ્ગિન્ ॥ ૪૨॥

કમલનયનં કાલોદઞ્ચત્સિતેતરપઙ્કજ-
દ્યુતિશરદુમાકાન્તોત્તંસપ્રભાધવલસ્મિતમ્ ।
ત્રિજગદુદરવ્યાપ્તં તેજો વિરિઞ્ચિભવાદિભિ-
ર્હૃદિ મમ સદા ભૂયાચ્છાર્ઙ્ગ દરં ચ દધન્મુદે ॥ ૪૩॥

પ્રસીદ મે દયાનિધે સમુદ્ધરાતિમ્વારિધેઃ
પ્રભો પયોધિજાસખે દરિદ્રતાં નિરસ્ય મે ।
તવૈકદેશ વિષ્ઠિતં જગચ્ચરાચરાત્મકં
તદેકદેશરૂપિણો ન મેવનં તવાધિકમ્ ॥ ૪૪॥

શાતકુમ્ભલસદાભરણાઢ્યાં
શ્યામલાં સુરુચિરામસમાનામ્ ।

શાર્ઙ્ગચાપધરતાવકમૂર્તિં
શાન્તચિત્ત ઇહ નિત્યમુપાસે ॥ ૪૫॥

નિર્મલં નિયમિતાસુરજઙ્ઘં
નિર્જરૌઘવરસમ્મદહેતુમ્ ।
નન્દકાખ્યકરવાલમુદારં
નૌમિ શાર્ઙ્ગધનુષો મયનુત્યૈ ॥ ૪૬॥

ભર્જિતાસુરકલેવરવૃન્દાં
શાર્ઙ્ગિણઃ કરતલે વિલસન્તીમ્ ।
કાલિકાગ્નિચયભીષણકાન્તિં
ચિન્તયે વરગદાં રિપુહત્યૈ ॥ ૪૭॥

નાદમૂર્ચ્છિત સરોજમવાણ્ડં
નિર્મલેન્દુસદૃશં રવિર્ભીમમ્ ।
કાન્દિશીકદિતિસમ્ભવસૈન્યં
શઙ્ખરાજમરિભૃત્તવ નૌમિ ॥ ૪૮॥

કાશિકાનગરતત્પતિકૃત્યા-
દાહકારણમમોઘમમેયમ્ ।
સર્વદેવમયસર્વશરીરં
ચક્રમીશ તવ નૌમિ કરાલમ્ ॥ ૪૯॥

સર્વદેવાદિદેવેશ શાર્ઙ્ગપાણે કૃપામ્બુધે ।
સ્તુતિવ્યાજાન્મમાગસ્ત્વં સહસ્વ સકલં પ્રભો ॥ ૫૦॥

ઇતિ શાર્ઙ્ગપાણિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Saritha Sangameswaran
Proofread by Saritha Sangameswaran, NA

*Sharngapani Stotram*
pdf was typeset on January 20, 2026

Please send corrections to *sanskrit@cheerful.com*